# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## संज्ञाप्रकरणम् (९)

## ०२.०८.२०१०

# पुनरावर्तनम्

- तपरकरणम्,
- वृद्धिः,
- गुणः,
- धातुः,
- निपाताः,
- शब्दस्य स्वरूपग्रहणम्

# २६. येन विधिस्तदन्तस्य (१.१.७२)

- त्रीणि पदानि । येन, विधिः, तदन्तस्य ।
- विशेषणं तदन्तस्य संज्ञा स्यात्, स्वस्य च रूपस्य ।
- 'अङ्गस्य' इत्यधिकारे 'जराया जरसन्यतरस्याम्' इति सूत्रेण जराशब्दस्य 'जरस्' आदेशः विधीयते ।
- अङ्गं विशेष्यम् । जरा इति विशेषणम् ।
- विशेषणं तदन्तस्य संज्ञा स्यात् – 'निर्जर' शब्दस्यापि जरसादेशः भवति ।
- स्वस्य च रूपस्य – केवल 'जरा' शब्दस्यापि जरसादेशः भवति ।

# समासप्रत्ययविधौ प्रतिषेधः (वा) ।

- समासविधौ, प्रत्ययविधौ च तदन्तग्रहणं नास्ति ।
- समासे यथा –
- द्वितीया श्रित-अतीत-पतित-गत-अत्यस्त-प्राप्त-आपन्नैः ।
- श्रितादयः विशेषणानि, सुबन्तमिति विशेष्यम् ।
- कृष्णं श्रितः = कृष्णाश्रितः ।
- कृष्णं परमश्रितः = ?? । समासविधौ तदन्तविधिप्रतिषेधात् श्रितान्तेन सुबन्तेन समासो न भवति ।

- प्रत्ययविधौ यथा –
- नडादिभ्यः फक् ।
- नडादिभ्यः इति विशेषणम्, प्रातिपदिकात् इति विशेष्यम् ।
- नडस्य गोत्रापत्यम् = नाडायनः ।
- सूत्रनडस्य अपत्यम् = ?? । प्रत्ययविधौ तदन्तविधिप्रतिषेधात् नडान्तस्य प्रातिपदिकस्य फक् प्रत्ययः न भवति ।

# उगिद्वर्णग्रहणवर्जम् (वा) ।

- यत्र सूत्रे उगिद्-ग्रहणम्, अथ वा वर्णग्रहणमस्ति, तत्र समासप्रत्ययविधावपि तदन्तविधिः अस्ति । उगिद्वर्णग्रहणं वर्जयित्वा अन्यत्र समासप्रत्ययविधौ प्रतिषेधः ।
-

- उगिद्-ग्रहणं यथा –
- उगितश्च । ङीप्-प्रत्ययः विधीयते ।
- उगितः इति विशेषणम्, प्रातिपदिकात् इति विशेष्यम् ।
- उक् इत् यस्य सः उगित् । उक् प्रत्याहारः = उ, ऋ, ऌ । एते वर्णाः यत्र इत्-संज्ञां प्राप्नुवन्ति, सः उगित् ।
- उदा – भवतु शब्दः (सर्वनाम - उकारः इत्)
- भवत् + ङीप् = भवती ।
- तदन्तविधिः अस्ति । तस्मात् अतिभवत् शब्दादपि ङीप् भवति । अतिभवती ।

- वर्णग्रहणं यथा –
- अत इञ् । इञ् प्रत्ययः विधीयते ।
- अतः=ह्रस्व अकारात् इति विशेषणम् । प्रातिपदिकात् इति विशेष्यम् ।
- तदन्तविधेः सत्त्वात् अकारान्तात् प्रातिपदिकात् इञ् प्रत्ययः भवति ।
- दशरथस्य अपत्यं दाशरथिः ।
- केवलात् अकारादपि भवति ।
- अस्य अपत्यम् इः ।

# २७. विरामोऽवसानम् (१.४.११०)

- पदद्वयम् । विरामः, अवसानम् ।
- वर्णानामभावः अवसानसंज्ञः स्यात् ।
- राम स्
- राम र् – अवसानम्
- रामः (खरवसानयोः विसर्जनीयः – इति रेफस्य विसर्गः)

# २८. परः सन्निकर्षः संहिता (१.४.१०९)

- पदत्रयम् ।
- वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

# २९. सुप्तिङन्तं पदम् (१.४.१४)

- पदद्वयम् ।
- सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ।
- 'हरिः' इति पदम्, न तु 'हरि' । 'भवति' इति पदम्, न 'भू' इति ।
- अपदं न प्रयुञ्जीत ।

# ३०. हलोऽनन्तराः संयोगः (१.१.७)

- पदत्रयम् । हलः, अनन्तराः, संयोगः ।
- अज्भिः अव्यवहिताः हलः संयोगसंज्ञाः स्युः ।
- हलः – ह् अ ल् अः
- व्यञ्जनानि – व् य् अ ञ् ज् अ न् आ न् इ

# ३१. ह्रस्वं लघु (१.४.१०)

- पदद्वयम् ।
- लघु, गुरु

# ३२. संयोगे गुरु (१.४.११)

- पदद्वयम् । 'ह्रस्वम्' इत्यनुवर्तते ।
- संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।
- कृष्ण

# ३३. दीर्घं च (१.४.१२)

- पदद्वयम् । 'गुरु' इत्यनुवर्तते ।
- दीर्घं च गुरुसंज्ञं स्यात् ।
- राम